International Journal of Sanskrit Research 2022; 8(1): 90-92

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(1): 90-92
© 2022 IJSR
www.anantaajournal.com
Received: 06-10-2021
Accepted: 27-12-2021

**डॉ. चन्द्रकिशोर**
श्री लाल बहादुर शास्त्री राष्ट्रिय संस्कृत विश्व विद्यालय, नई दिल्ली, भारत

**Corresponding Author:**
**डॉ. चन्द्रकिशोर**
श्री लाल बहादुर शास्त्री राष्ट्रिय संस्कृत विश्व विद्यालय, नई दिल्ली, भारत

# साहित्यशास्त्रस्य सम्प्रदायानाम् परिचयः

**डॉ. चन्द्रकिशोर**

## प्रस्तावना

काव्यशास्त्रस्य अनुशीलनेन प्रतीयते यत्काव्यशास्त्रे विभिन्नाः सम्प्रदायाः सन्ति।
ते च सम्प्रदायाः काव्यस्य आत्मतत्त्वविवेचनेन सञ्जाताः। काव्ये किमस्ति आत्मस्थानीयं सर्वोत्कृष्टं तत्त्वं, येन काव्ये काव्यत्वं जायते। अत्र प्रश्ने काव्यशास्त्रिणां षटसंख्याकानि मतानि अद्यावधि प्रादुरभूवन्। तद्यथा-

१. रससम्प्रदायः
२. अलङ्कारसम्प्रदायः
३. ध्वनिसम्प्रदायः
४. रीतिसम्प्रदायः
५. औचित्यसम्प्रदायः
६. वक्रोक्तिसम्प्रदायः

## १. रससम्प्रदायः

रससम्प्रदायस्य प्रवर्तकः भरतमुनिः अस्ति भरतमुनिना विरचिते नाट्यशास्त्रे रसस्य काव्यात्मरुपेण प्रतिष्ठापना प्रतिष्ठापना प्रथमतया दृश्यते। एतदर्थं नाट्यशास्त्रस्य षष्ठे सप्तमे चाध्याये रसभाव्योः प्रतिपादनं सविशेषं द्रष्टव्यम्। भरतस्य रससूत्रं अस्ति-

विभावानुभावव्यभिचारिसंयोगात् रसनिष्पत्तिः[1]।

अस्य रससूत्रस्य प्रधानभूता व्याख्यातारः चत्वारः सन्ति-
भट्टलोल्लटः शंकुकः, भट्टनायकः, अभिनवगुप्तश्च। नवरसाः वर्तन्ते- श्रृङ्गारहास्यकरुणरौद्रवीरभयानकवीभत्साऽद्भुतशान्तश्चेति।
तदुक्तं काव्यप्रकाशे मम्मट्टाचार्येण-

श्रृङ्गारहास्यकरुणरौद्रवीरभयानकाः।
वीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः॥
निर्वेदस्थायिभावोऽस्ति शान्तोऽपि नवमो रसः[2]॥

---

1 . नाटयशास्त्रम्-षष्ठध्याये रसप्रकरणम् ।
2. काव्यप्रकाशः ४/३०.३५

रसस्य काव्यात्मरूपता आदिकावेः वाल्मीकेः प्रथमकाव्यस्फुरणद्वारेणापि प्रमाणिता भवति।
तदुक्तं आनन्दवर्धेनन-

क्रौञ्चद्वन्द्ववियोगोत्थः शोकः शोकः श्लोकत्वमागतः[3]।

**अलंकारसम्प्रदायः**

अलंकारसम्प्रदायस्य प्रवर्तक भामह अस्ति। रुद्रटेन उद्भटेन च समर्थितः अलंकारसंप्रदायः सम्पन्नः दृश्यते। अस्मिन् सम्प्रदाये अलंकारः एव काव्यस्यात्मा स्वीक्रियते। यथा अग्निः उष्णतारहितः भवितुं नार्हति[4], तथैव काव्यमपि अलंकारहीनं भवितुं नार्हति। अलंकारसम्प्रदायानुसारं अलंकारः काव्यस्य जीवनधायकं तत्त्वं वर्तते, तस्य अलंकारस्य अनुप्रासोपमादयः भेदाश्च भवन्ति। अलंकाराणां विकासप्रक्रिया दीर्घा अस्ति। नाट्यशास्त्रे चतुर्णामलंकाराणां प्रतिपादनं अस्ति, कुवलयानंदे च १२५ अलंकाराणां निरूपणं दृश्यते। अलंकारसंप्रदाये रसतत्त्वस्य अन्तर्भावः अलंकारेषु एव भवति रसवत्, प्रेयः उर्जवस्वी, समाहितश्चेति चतुर्षु अलंकारेषु रसस्य भावस्य च समग्रोऽपि विषय भामहेन सन्निवेशितः[5]।

**ध्वनिसम्प्रदायः**

ध्वनिसम्प्रदाय प्रवर्तकःआचार्य आनन्दवर्धनः अस्ति। आनन्दवर्धनस्य ध्वन्यालोके ध्वनिसिध्दान्तस्य प्रबलं प्रवर्तनम दृश्यते। तथोक्तं तत्र-

काव्यस्यात्मा ध्वनिरिति बुधैर्य: समाम्नातपूर्व-
स्तस्याभावं जगदुरपरे भाक्तमाहुस्तमन्ये।
केचिद्वाचां स्थितमविषये तत्त्वमूचुस्तदीयम्।
तेन ब्रूमः सहृदयमनः प्रीतये तत्स्वरुपम्[6]॥

एवं प्रकारेण ससंरम्भं ध्वनिविरोधिनां मतानि खण्डयन् आनन्दवर्धनाचार्य ध्वनिसिध्दान्तस्य साङोपाङ्गं प्रतिपादनं विधाय काव्यात्मकतया ध्वनि प्रोवाच। परवर्तियुगे ध्वनिसम्प्रदायस्यैव प्राबल्यं दृश्यते।
वाग्देवतावतारः आचार्य मम्मटः काव्यप्रकाशे ध्वनिसिध्दान्तस्य सुदृढां प्रतिष्ठां विदधाति। अयं ध्वनिसिध्दान्तः रससिध्दान्तेन प्रभावितः दृश्यते। रसः कदापि वाच्यो वा लक्ष्यो वा न भवति अपितु सर्वदैव सर्वथैव च व्यङ्गय एव भवति।
आनन्दवर्धनाचार्यः तं व्यङ्ग्यार्थं काव्ये सर्वातिशयेन प्रतिष्ठापयन् ध्वनिसिध्दान्तं प्रवर्तयते। ध्वनिवादे व्याकरणशास्त्रस्य प्रभावोऽपि दृश्यते[7]। तदिदं मम्मटभट्टः समर्थन् कथयति-

बुधैः व्याकरणैः प्रधानभूतस्फोटरुपव्यङ्ग्यव्यञ्जकस्य च शब्दस्य ध्वनिरिति व्यवहारः कृतः।

ततस्तन्मतानुसारिभिरन्यैरपि..........इत्यादि [8]।

ड्राइडननामकः आङ्गलाचार्यः कथयति-
More is meant that meets the ear.

तदनुसारं यत श्रूयते तद् अभिधेय भवति। श्रूयमाणादधिक कवेः तात्पर्यं निस्सन्देहं ध्वनेरेव स्वरुपं भवति [9]।

**रीतिसम्प्रदायः**

रीतिसम्प्रदाय प्रवर्तकः आचार्यो वामनः अस्ति। वामनाचार्यः स्वकीये काव्यालंकारे रीतिं काव्यात्मत्वेन साधयति। पदानां विशिष्टा रचना रीतिरिति कथ्यते। पदसंघटनायां रीतिपरकं वैशिष्टयं काव्यगुणेभ्यः आगच्छति। गुणा एव रीते आधारभूताः। अतएव रीतिसम्प्रदायः गुणसम्प्रदायोऽपि कथ्यते। आचार्योदण्डी अपि रीतिसम्प्रदायस्य समर्थकः वर्तते।
वामनानुसारं दश शगुणाः दश अर्थगुणाश्च भवन्ति। उभयत्रापि तेषां नामानि यथा- श्लेषः, प्रसादः, समाधिः, माधुर्यं, ओजः, सुकुमारता, अर्थव्यक्ति, उदारता, समता, कान्तिश्च,।वैदर्भीरीतौ ते सर्वेऽपि गुणाः भवितुमर्हन्ति। गौडीरीतौ ओजोगुणः कान्तिगुणश्च भवतः। पाञ्चालीरीतौ माधुर्यगुणस्य प्रसादगुणस्य च सत्ता स्वीक्रियते। वामनाचार्यः साहित्यशास्त्रे गुणानां अलकाराणां च परस्परं भेदं कृत्वा साहित्य जगतः महान्तं उपकारं कृतवान्।
तदनुसारम् –

काव्यशोभायाः कर्तारो धर्मागुणाः
तदतिशयहेतवोऽलंकाराः।

**औचित्यसम्प्रदायः**

औचित्यसम्प्रदायस्य प्रवर्तकः आचार्यप्रवरः क्षेमेन्द्रः अस्ति। क्षेमेन्द्रेण औचिविचारचर्चा नामके स्वकीये ग्रन्थे औचित्यस्य काव्यात्मत्वेन प्रतिष्ठां विदधाति।

तदनुसारम्-

कण्ठे मेखलायां नितम्बाफलके तारेण हारेण वा

---

3. ध्वन्यालोक-१/५

5. भामहस्य-काव्यलंकार ३/१

6. आनन्दवर्धनस्य ध्वन्यालोकः १/१

7. साहित्यशास्त्र का इतिहास-पृ.२८५-२८६

8. मम्मटस्य काव्यप्रकाशः प्रथमोल्लासे

9. साहित्यशास्त्र का इतिहास-पृ.२८७-२८८

पाणौ नूपुरबन्धनेन चरणे केयूरपाशेन वा।
शौर्येण प्रणते रिपौ करुणया नायान्ति के हास्यता-
मौचित्येन विना रुचिं प्रतनुते नालंकृतिर्नोगुणाः[10]॥

साहित्यशास्त्रे औचित्यस्य महत्त्वं सर्वैरपि आलंकारिकैः स्वीकृतम्।
आनन्दवर्धनाचार्यः ध्वन्यालोके लिखति-
अनौचित्याद् ऋते नान्यद् रसभङ्गस्य कारणम्।
औचित्योपनिबन्धस्तु रसस्योपनिषत् परा[11]॥

उचितस्य भावः औचित्यं इति कथ्यते। यथा लौकिके व्यवहारे औचित्यस्य महत्त्वमस्ति, तथैव काव्येऽपि। क्षेमेन्द्रेण पदे वाक्ये, अर्थे, रसे कारके लिङ्गवचनादिषु च औचित्यस्य स्थानं प्रतिपाद्य काव्यस्य जीवनाधायकरुपेण तस्य निरुपणं कृतम्। केचनं साहित्यशास्त्रसमीक्षकाः औचित्यं साहित्यिकसिध्दान्तरुपेण स्वीकुर्वाणाः अपि तस्य साहित्यिकसम्प्रदायस्वरुपतां खण्डयन्ति[12]।
वक्रोक्तिसम्प्रदायस्य प्रवर्तकः कुन्तकाचार्यः अस्ति। कुन्तकेन वक्रोक्तिजीवितनामके स्वकीये ग्रन्थे वक्रोक्ते काव्यात्मकता साधयति। तत्कृत वक्रोक्तिलक्षण विद्यते-

वक्रोक्तिरेव वैदग्ध्यभङ्गीभणितिरुच्यते।

वक्रोक्तिः प्रसिध्दाभिधानव्यतिरेकिणी विचित्रैधाऽभिधा। कीदृशी वैदग्ध्यभङ्गीभणितिः? वैदग्ध्यं विदग्धभावः कविकर्मकौशलं, तस्य भङ्गी विच्छित्तिः तया भणितिःविचित्रैवाऽभिधा वक्रोक्तिरित्युच्यते। वक्रोक्तेःएवंविधं स्वरुपं भामहाचार्यः पूर्वमेव स्वकीये काव्यालङ्कारनामकेग्रन्थे संकेतितवान आसीत तत्र तेनोक्तम् -

सैषा सर्वत्र वक्रोक्तिरनयाऽर्थो विभाव्यते
यत्नोऽस्यां कविना कार्यः कोऽलंकारोऽनया विना [13]॥

काव्यस्यजीवितरुपेण वक्रोक्तेः प्रतिपादनं वक्रोक्तिजीविते कुन्तकेन कृतम् ।

**सन्दर्भ**


1. औचित्यविचारचर्चा, लेखक- आचार्य क्षेमेन्द्र, प्रकाशक- चौखम्बा विद्या भवन वाराणसी, संस्करण-प्रथम- १९८९
2. काव्यमीमांसा- लेखक-राजशेखर, सम्पादक-हरिदाश- संस्कृत ग्रन्थमाला-१४
   प्रकाशक- चौखम्बा सीरीज वाराणसी
3. काव्यालङ्कार सूत्राणि- लेखक–वामनाचार्यः, सम्पादक-श्रीनारायणरामः
   प्रकाशक- मोतीलाल बनारसीदास नई दिल्ली
4. काव्यप्रकाशः- लेखक-मम्माटाचार्य, व्याख्याकार- आचार्य विश्वेश्वर
   प्रकाशक- ज्ञान मण्डल लिमिटेड वाराणसी, संस्करण- प्रथम-१९८९
5. काव्यालङ्कारः- लेखक-भामहाचार्यः, सम्पादक-बलदेव उपाध्याय, संस्करण-द्वितीय,२०१०
6. काव्यादर्शः- लेखक-महाकविदण्डी, व्याख्याकार- श्रीमज्जीवानन्द विद्यासागर भट्टाचार्य
   प्रकाशक- भारतीय विद्याप्रकाशन वाराणसी, संस्करण- प्रथम १९९१
7. ध्वन्यालोकः- लेखक-आनन्दवर्धनाचार्य, व्याख्याकार- डॉ. कृष्णकुमार
   प्रकाशक-साहित्य भण्डार मेरठ, संस्करण- द्वितीय- २०१०
8. नाट्यशास्त्रम्- लेखक-आचार्य भरतमुनि, सम्पादक- भारतीय विद्या प्रकाशन वाराणसी
9. वाक्यपदीयम्, ब्रह्मकाण्ड: लेखकः- आचार्यभर्तृहरि, व्याख्याकारः-डॉ.शिवशंङ्करः अवस्थी
   प्रकाशनम्-चौखम्बाविद्याभवनवाराणसी, संस्करणम्- २०१०
10. वक्रोक्तिजीवितं, लेखक- राजानककुन्तक, व्याख्याकार- श्री राधेश्याम मिश्र
    प्रकाशक- चौखम्बा संस्कृत संस्थान वाराणसी, संस्करण-द्वितीय-१९८३
11. साहित्यदर्पण- लेखक-विश्वनाथ कविराजः, व्याख्याकार-शालिग्राम शास्त्री
    प्रकाशक-मोतीलाल बनारसीदास नई दिल्ली
12. संस्कृत शास्त्रों का इतिहास- लेखक-आचर्य बलदेव उपाध्याय, प्रकाशक- चौखम्बा विद्याभवन वारणसी संस्करण- प्रथम-२०१०


10. क्षेमेन्द्र औचित्यविचारचर्चा-षष्ठकारिकाया वृत्तिभागे ।
11. आनन्दवर्धनस्य ध्वन्यालोकः-३/१४ वृत्तिभागे ।
12. साहित्यशास्त्र का इतिहास-पृष्ठ.२८०-२८१
13. भामहस्य काव्यलंकार